International Journal of Sanskrit Research 2018; 4(6): 136-138

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 136-138
© 2018 IJSR
www.anantaajournal.com
Received: 26-09-2018
Accepted: 27-10-2018

डाँ .आशिषः जे
ज्योतिषविभागः, राष्ट्रिय संस्कृत विद्यापीठम्
तिरुपतिः, आन्ध्रप्रदेश, भारत

Correspondence
डाँ .आशिषः जे
ज्योतिषविभागः, राष्ट्रिय संस्कृत विद्यापीठम्
तिरुपतिः, आन्ध्रप्रदेश, भारत

# स्वास्थ्यसंरक्षणे ज्योतिषशास्त्रस्य वैशिष्ट्यम्

**डाँ .आशिषः जे**

वेद्चक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।
संयुतोऽपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः॥ [1]

वेदाङ्गेषु अन्यतमं भवति ज्योतिषशास्त्रम्। आधुनिककाले ज्योतिषशास्त्रस्य महत्त्वम् अतीवं विद्यते। ज्योतिषशास्त्रस्य स्कन्धत्रयं विशिष्टरूपेण विद्यते तत् फलितज्योतिषम् सिद्धान्तज्योतिषं संहिताचेति। ज्योतिषशास्त्रस्य षडङ्गान्यपि सन्ति तान्यथा गोल-गणित-जातक-प्रश्न-मुहूर्त-निमित्तश्चेति। फलितज्योतिषान्तर्गतजातकाधारणैव जीवराशीनामुपरि ग्रहाणां प्रभावः सम्यक् ज्ञायते।

### ज्योतिषशास्त्रस्य वैज्ञानिकता

यथा प्रतिदिनं सूर्यस्य प्रकाशः, तद्वारा कमलानां विकासश्च तथैव शीतांशोः आगमनेन कैरवानां विकासश्च अस्माभिः ज्ञायते तथैव जायोतिषशास्त्रस्य प्रमाणमपि सम्यग्विज्ञायते। अमुमेव विषयं जातकसारदीपनामकग्रन्थे एवमुक्तमस्ति-

अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम्।
प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ॥ [2]

### रोगस्य मूलकारणम्

जगति प्रत्येक जीवराशिः रोगग्रस्तानुभवी भवति एव। कदाचित् रोगस्य सम्भावना सर्वेषां भवेत्येव। वैद्यशास्त्रप्रकारेण रोगस्सम्प्राप्यनन्तरमेव तस्य सूचना ज्ञायते। परन्तु ज्योतिषशास्त्रद्वारा रोगात्पूर्वमेव रोगनिर्धारणं कृत्वा निवारणोपायानपि कर्तुं शक्नुमः।

रोगपीडातकारणानि अनेकानि भवन्ति। यथा भूताद्यावेशः, ग्रहगतिः, वातपित्तप्रकोपः इत्यादयः। परन्तु एतत्त्रयाणां कारणं तु वास्तुतः पूर्वजन्मकृतपापकर्माणां फलस्य विपाक एव। एषः पाप एव रूपत्रयेण फलदाता भविष्यति।

शुभ तथा अशुभफलं दृढमेवम् अदृढकर्मजन्यकारणेन द्विप्रकारकं भवति। तथैव तेऽपि मन – वचन - कर्मभ्यः उत्पन्नकारणेन पुनः त्रिप्रकारकमिति कथ्यन्ते। वंशगतेन तथा आगन्तुकभेदेन रोगः द्विप्रकारको भवति। तथैव सहज तथा आगन्तुकरोगेभ्यः प्रत्येकप्रकारद्वयं सम्पद्यते।

एवं प्रकारेण मनुष्याणां पूर्वकृतपापम् एव रोगकारणानि भवन्ति। तस्य रोगस्य शान्तये औषधि-दान-जप-होम-पूजा- इत्यादि क्रियाः करणीया एव। अमुमेव विषयं प्रश्नमार्गे एवमुक्तमस्ति-

जन्मान्तरकृतं पापं व्याधिरूपेण जायते।
तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः॥ [3]

आधुनिककाले जनाः वैद्यकरणावसरे रोगनिवारणाय एव औषधस्वीकरणं कुर्वन्ति परन्तु रोगनिमित्तपूर्वकर्मविषये कमपि परिहारं न चिन्तयन्ति। यथा सर्वकार्येषु सहायकसामग्री दृष्टादृष्टरूपेण उभयरूपेण भवति तथैव रोगनिवारणावसरे चिकित्सायामपि औषधि तथा प्रायश्चितमुभयमपि करणीयमिति शास्त्रकाराणां मतम्।

**रोगविचारे द्वादशभावाः**

प्रथमभावः - शिरः-मस्तिष्कः-वर्णः-ललाटः च

द्वितीयभावः - मुखम्-आस्यम्-दन्ताः-वाक्-दक्षिणनेत्रम्-नासिका-ओष्ठः-जिह्वा च

तृतीयभावः - कण्ठः-दक्षिणकर्ण-ग्रीव-भुजः-मणिबन्धः-हस्तौ-शारीकपुष्टि च

चतुर्थभावः - वक्षस्थल-स्तनौ-उरः-श्वासनालः च

पञ्चमभावः - हृदयं-मनः-उदरं-नाभिः च

षष्ठमभावः - सामान्यव्याधयः-आघातः-शस्त्रचिकित्सा च

सप्तमभावः - वस्तिः-मूत्राशयः-गर्भाशयस्योपरिभगः च

अष्टमभावः - जननेन्द्रियम्-गुदप्रदेशः-शाश्वतरोगाः च

नवमभावः - कटिभागः-ऊरूः च

दशमभावः - जानु च

एकादशभावः - वैमकर्ण-जङ्घा च

द्वादशभावः - पादतलं-पादौ-पादाङ्गुल्यां-वामनेत्रं-मरणं च

**ग्रहाधारेण रोगनिर्णयः**

**सूर्यग्रहाधारेँण** - पित्तविकारः-उष्ण-ज्वर-ताप-देहपतन-अपस्मार-हृदयरोग-नेत्ररोग-शत्रुभय-चर्मरोग- कुष्टरोग इत्यादयः रोगाः ज्ञातुं शक्नुमः।

**चन्द्रग्रहाधारेण** - निद्रा-आलस्य-कफविकार-अतिसार-पिटकाः-शीतज्वर-स्त्रीरोग-कामिलाः-मानसिकरोग-रक्तविकार इत्यादयः रोगाः ज्ञातुं शक्नुमः।

**कुजग्रहाधारेण** - तृष्ण-रक्तिकार-पित्तविकार-ज्वर-विष-शस्त्रपीडा-कुष्टरोग-नेत्ररोग-गुल्मरोग-अपस्मार-मज्जारोग-कण्डूति इत्यादयः रोगाः ज्ञातुं शक्नुमः।

**बुधग्रहाधारेण** - भ्रान्ति-वाग्दोष-नेत्र-गल-नासिकादोष-पित्तकफवातदोषाः-ज्वर-विषज्वर-पाण्डुरोग-दुःस्वप्न इत्यादयः रोगाः ज्ञातुं शक्नुमः।

**गुरूग्रहाधारेण** - गुल्मरोग-मूर्च्छा-कफविकार- कर्णविकार-प्रमेहरोग इत्यादयः रोगाः ज्ञातुं शक्नुमः।

**शुक्रग्रहाधारेण** - पाण्डु-श्लेष्म-वायुविकार- नेत्रविकार-निद्रा-गुप्तरोग-मूत्ररोग-वीर्यस्राव इत्यादयः रोगाः ज्ञातुं शक्नुमः।

**शनिग्रहाधारेण** - वायुविकार-श्लेष्म-पङ्गुता-आलस्य-भ्रान्ति-आगन्तुकरोगः-हृदयरोग इत्यादयः रोगाः ज्ञातुं शक्नुमः।

प्रश्नशिरोमणिग्रन्थे पण्डितरुद्रमणिः कथयति यत् लग्ने वैद्यस्य अभिज्ञानं, चतुर्थभावे औषधज्ञानं, षष्टभावे रोगस्य विचारः, द्वादशभावे रोगिः ज्ञानं च सम्यक् विचारणीयमिति। अस्य आधारेणैव पण्डिरुद्रमणिः केचन योगानां विषये एवमुद्घाटयति-

यदि लग्ने शुभग्रहः भवति चेत् जातकः सुखी भवेत्। यदि चतुर्थभावे पापग्रहश्चेत् वैद्यदत्तौषधेनैव तस्य रोगः बहुकालं यावं तिष्ठेत्। तथैव चतुर्थभावे शुभग्रहश्चेत् सद्वैद्येन दत्तौषधेन रोगस्य निवारणं भविष्यति। सप्तमभावेपापग्रहश्चेत् औषधेन तथैव वैद्येन अन्यरोगाः अपि उत्पद्यन्ते। तथैव सप्तमभावे शुभग्रहश्चेत् रोगनिवारणं भवति। दशमे पापग्रहश्चेत् स्ववैद्येन नाम स्वयंकृतापराधेन रोगवृद्धिः सम्भाव्यते। शुभग्रहश्चेत् रोगनाशः सम्भाव्यते।

### रोगस्य आरम्भकालज्ञानम्

षष्टमभावाधिपतिः यस्मिन् राशौ तिष्ठति तस्मिन् राशौ गोचारचन्द्रः यदा प्रविशेत् तदा रोगोत्पन्नः भवेत्। चतुर्थभावाधिपतिः यस्मिन् राशौ तिष्ठति तस्मिन् राशौ गोचारचन्द्रः यदा प्रविशेत्तदा रोगशमनं सम्भाव्यते।

### रोगस्य कालावधि कथनम्

षष्ठमाधिपतिः यस्मिन् राशौ तिष्ठति तस्य भुक्त – भोग्य अंशानुसारेण रोगः कदा जातः कियत् कालपर्यन्तं तिष्ठेदिति विषयः उच्यते।

> रोगभेदानिति ज्ञात्वा चिकित्सामुचितां वदेत्।
> तीव्रे कर्मविपाकोक्त प्रायश्चित्तञ्च शान्तये।। [4]

वैद्येन आदौ रोगं सम्यग्विज्ञाय तस्य निवारणाय समुचितचिकित्सा वक्तव्या। तीव्रा तथा कर्मणव्याधिः जाते सति कर्मविपाकसंहितानुसारेण उपायः वक्तव्यः।

यथा वापीकूपादि भेदान् अतिसारः सञ्जायते। तस्य शान्त्यर्थं रुद्रसूक्तं तथा आयुः सूक्तजपञ्च करणीयमिति मुनीद्रैः उक्तमासीत्। अन्यजनस्य ओष्ठच्छेदनं – दन्तभङ्गः – जिह्वकर्तन – गुरुवचननिराकरणं – गुरुसम्मुखे असत्यभाषणम् – असत्यसाक्ष्यम् इत्यादिभिः मुखरोगोत्पन्नः सञ्जायते। अस्य रोगस्य शान्त्यर्थं कूष्माण्डमन्त्रैः हवनं, गायत्रीजपः च करणीयः इति पूर्वाचार्यैः उक्तमासीत्।

### उपसंहार

रोगस्य मूलकारणं नान्वेष्य रोगस्यैव यावत् पर्यन्तं औषधं ददाति चेदपि रोगस्य मूलकर्म तथैव तिष्ठति। अतः ज्योतिषशास्त्रद्वारैव कर्मपरिहारं तथैव रोगपरिष्कारञ्च क्रियते चेत् सः रोगः सपदि नश्यतीति नास्ति सन्देहः।

### परिशीलितग्रन्था


1. (सिद्धान्तशिरोमणिः.1.19)
2. (जातकसारदीप.1.26)
3. (प्रश्नमार्ग.13.29)
4. (प्रश्नमार्ग.12.68)